# Navanatha Stotram

# નવનાથસ્તોત્રમ્

## Document Information

```
Text title : Navanathastotram
File name : navanAthastotram.itx
Category : deities_misc, gurudev, stotra
Location : doc_deities_misc
Transliterated by : Aaditya Kalyanaraman aadityakalyaan at gmail.com
Proofread by : Aaditya Kalyanaraman aadityakalyaan at gmail.com
Latest update : August 28, 2021
Send corrections to : sanskrit@cheerful.com
```

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

August 28, 2021

*sanskritdocuments.org*

# નવનાથસ્તોત્રમ્

ૐ નમો નવનાથેભ્યઃ ।
અથ નવનાથસ્તોત્રમ્ ।
આદેશવસ્તુવિષયઃ સુરસિદ્ધલક્ષ્યો યશ્ચૈકનાથ ઇહ સન્નવમૂર્તિ-પૂર્તિઃ ।
સર્વોપરિ પ્રતિપલં વરિવર્તિ કુર્વે કાયેન તસ્ય મનસા વચસા પ્રણામમ્ ॥ ૧॥

મોહાન્ધકારવિચલન્મનસો મનુષ્યાં, સ્વત્ત્વોજ્ઝિતાનપિ પરમ્પરયોપદેષ્ટુમ્ ।
તત્ત્વં વિમુક્તય ઉતાકૃત યોગશાસ્ત્રમાદેશ એતુ મમ તત્ર ય આદિનાથઃ ॥ ૨॥

યો હ્યાદિનાથ ઉત રાઘવમત્સ્યજન્મા મત્સ્યેન્દ્રનાથ ઇતિ યોગકભોગવૃત્તિઃ ।
વિસ્માપયન્નખિલસિદ્ધસુરાંશ્ચ જાત આદેશ એતુ મમ તત્ર પવિત્ર મૂર્તૌ ॥ ૩॥

યો હ્યાદિનાથ ઉત ભોગભરં વિહાય યોગં સતત્ત્વમુદય ક્રમતો નિનાય ।
નામ્ના શ્રુતોઽસ્ત્યુદયનાથ ઇતિ શ્રિતશ્રીરાદેશ એતુ મમ તત્ર પવિત્રમૂર્તૌ ॥ ૪॥

યશ્ચાપ્યનેકભવભૂતગણાન્ કૃપાતઃ પાત્વાતિપીડિતહૃદઃ કિલ કાલદણ્ડાત્ ।
તદ્દુર્લભામરપદઃ સ સુખં નિનાય યદ્દણ્ડનાથ ઇતિ સિદ્ધગણપ્રસિદ્ધઃ ઈ ॥ ૫॥

આત્માનમેવ સકલેભ્ય ઉપાદિદેશા, ત્મન્યેવ નિત્યરમણં કિલ યસ્ય યસ્માત્ ।
સત્યપ્રવાહક ઇતો નહિ સત્યમન્યત્ સત્ય સ્વરૂપ ઇહ યત્ કિલ સત્યનાથઃ ॥ ૬॥

સત્યસ્વરૂપકતયા સતતં હ્યસઙ્ગ એકાન્તિકોઽપિ સતતં સ્વમુખે પરાખ્યે ।
સન્તોષમાદધદયં પ્રસસાદ યસ્માત્ સન્તોષનાથ ઇતિ ગીયત ઇડયનામા ॥ ૭॥

કૂર્માભિધાનમુપલક્ષણમાદધાનો ભૂમીમધોભુવનમપ્યબતીહ યસ્માત્ ।
યઃ કૂર્મનાથ ઇતિ શર્મકરો જનાના-માદેશ એતુ મમ તત્ર પવિત્રમૂર્તૌ ॥ ૮॥

પુણ્યાત્મનાં વિજયતાં (ત્રિજગતાં) કિલ ભુક્તિ-મુક્તિ-દાને પુનઃ પરમતત્ત્વનિદેશનાય ।
પ્રાવર્તતાનુગુણયોગમયાનુભૂતિ-યેનોત્તમા સ ચ જલન્ધરનાથનામા ॥ ૯॥

સર્વે ક્ષયેણ રહિતા વિહિતાશ્ચ યેન યે ચેતના હિ ગુણરૂપવિલક્ષણત્વાત્ ।
ગોરક્ષનાથ ઇતિ યઃ કથિતો હિ યસ્મા-દ્વાદેશ એતુ મમ તત્ર પવિત્રમૂર્તૌ ॥ ૧૦॥

નવનાથનુતિં સતતં રુચિરાં, પઠતીહ જનઃ પરમાદરતઃ ।
પરિતોષમુપેત્ય સ નાથ ઇતઃ પ્રદદાતિ મનોરથમાત્મસુખમ્ ॥ ૧૧॥

॥ ઇતિ શ્રીનવનાથસ્તોત્રં સમ્પૂર્ણમ્ ॥

Encoded and proofread by Aaditya Kalyanaraman aadityakalyaan at gmail.com

*Navanatha Stotram*

pdf was typeset on August 28, 2021

Please send corrections to *sanskrit@cheerful.com*